Digitization by eGangotri-South Center

ஸரள ஸம்ஸ்க்ருத சிக்ஷக்

(தமிழ்)

PART - VIII

ஸம்ஸ்க்ருத விச்வ பரிஷத்தின் தரப்பில்
பாரதீய வித்யாபவனத்தினால் நடத்தப்படும்
பரீக்ஷைப் பிரிவு

ஸம்பாதகர்கள்

ஜயந்த க்ருஷ்ண ஹ.தவே .மா. நியாமகர், பா.வி.ப
வேங்கடேச்வர தீக்ஷிதர், ஆசார்யர், மு.ஸம்.ப.
மஹேச் சந்த்ர சாஸ்த்ரீ, வித்யாபாஸ்கர், பரீக்ஷாமந்த்ரீ

பாரதீய வித்யா பவன்
சௌபாதி ரோடு,
பம்பாய் – 7.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

விலை : ரூபாய் 25–00

அச்சிட்டோர்:
சென்னை மைக்ரோ பிரிண்ட் (பி) லிமிடெட்
சென்னை– 29. போன்: 2374 0099

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

நான்காம் பதிப்பு - 2000 (1997)

விலை : 25.00

அச்சிட்டோர்
சென்னை மைக்ரோ பிரிண்ட் (பி) லிமிடெட்,
சென்னை – 29. போன்: 2374 0099

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பொருளடக்கம்

		பக்கம்
1.	अपकारेऽपि साधुता ...	1
2.	रामेण कुशलव परिग्रहः ...	6
3.	ஐந்தாவது கண தாதுக்கள் ...	9
4.	ஏழாவது கண தாதுக்கள் ...	12
5.	स्वामिभक्ता पक्षाघाती ...	15
6.	रामाज्ञया लक्ष्मणः सीतां वने विजहाति	23
7.	पुत्रवियोगेन दशरथस्य शोकावेगः	26
8.	पञ्चवटी निवासाश्रमः	32
9.	वेणीसंहारः	34
10.	எட்டாவது கண தாதுக்கள் ...	40
11.	श्री-सोम-स्तवराजः	49
12.	गजः	60
13.	सीतावियुक्तस्य रामस्य विलापः ...	64
14.	रामस्य वनगमनम् ...	68
15.	श्री-सोम-स्तवराजः ...	72

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीः

பாடம் 1

अपकारेऽपि साधुता

एकस्यां शालायां बहवश्छात्रा अपठन्। तत्र हरिः गणेशश्च द्वौ बालकौ आस्ताम्। तौ सखायौ अभवताम्। एकदा तयोरध्यापकः कक्ष्यायां छात्राणां लेखान् परीक्षमाणः प्राह—भोः छात्राः! शृणुत सावधानाः, "अग्रिमे सप्ताहे शनौ यः छात्रः अतिस्वच्छं सुन्दराक्षरं गम्भीरार्थं च लेखमानेष्यति, तस्मै प्रधानाध्यापकोऽस्माकं पारितोषिकं दास्यति" सर्वे छात्राः यथासमयं निजान् निबन्धान् उपस्थापयन्तु इति।

ततः सर्वेऽपि ते पारितोषिकप्राप्तये परेण प्रयत्नेन स्वान् स्वान् लेखान् संपादितवन्तः। प्रायस्ते अकथयन् हरिरस्मासु श्रेष्ठः, स एव वार्हति प्रथम

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पारितोषिकम्। गणेशः द्वितीयः, तृतीयस्तु रमेशः, सोऽपि गुर्वर्थं सुन्दरं च लिखति। परन्तु स्वच्छं न लिखतीति दोषः। हरिस्तु हरिरेव, स तु हरति मनांसि परीक्षकाणाम्। न तस्य समानः कक्ष्यायां वर्तते। तस्य लेखाः सन्ति सम्मानार्हाः। स हि पुरस्कारं अवश्यं लप्स्यते॥

रमेशः दुष्टप्रकृतिरासीत्। स कक्ष्यायां हरेः तथाभूतं सम्मानं न सेहे। सः शुक्रवासरे हरेः गृहं गत्वा तमूचे—अहो प्रियमित्र हरे! भवान् कक्षायां श्रेष्ठः इति कृत्वा अहं भवते स्वकीयं लेखं दर्शयितुं समागतोऽस्मि। पश्यतु कृपया, दर्शयतु च दोषान्, संशोधयतु तान् इति।

सोऽपि साधुस्वभावः यथाशक्ति रमेशस्य लेखे दोषान् दर्शयित्वा मौनं अतिष्ठत्। तदा रमेशः सानुनयं प्राह मित्र! देहि तव लेखपुस्तकम्; येनाहं त्वल्लिखितान् लेखान् पठित्वा, तव शैलीमधीत्य अनुगृहीतो भवेयम्। हरिः ससौलभ्यं स्वकीयं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लेखपुस्तकं रमेशायाददात्। सोऽपि तद् गृहीत्वा त्वरितैः पदैः गृहं अगच्छत्। तत्र स सर्वं तत् पुस्तकं सावधानतया पठित्वा लघुना हस्तेन भकारस्य स्थाने मकारं, सकारस्य स्थाने चकारं एवं तत्र तत्र विसर्गमनुस्वारं च लोपयित्वा सर्वं लेखं दूषयामास। निवर्तयामास च सायं हरये तस्य लेखपुस्तकम्।

व्यतीतानि सप्ताहदिनानि। शनिवासरः समायातः। सर्वे छात्राः स्वस्वनिबन्धान् अध्यापकस्य पुरतः उपस्थापयामासुः। परीक्षितानि च तानि उत्तरपुस्तकानि परीक्षकैः यथासमयम्।

इन्दुवासरे विद्यालये महती परिषद् उपातिष्ठत। श्रीमान् प्रधानाध्यापकः सभापतेः स्थानं भूषयाञ्चकार। लेखपरीक्षायां हरिः प्रथमः आसीत्। किन्तु तस्य लेखे बहवः मात्रानुस्वा विसर्गच्युतिदोषाः आसन इति स प्रथमं पुरस्कारं नार्हतीति कक्ष्याध्यापकः परिषदं श्रावयामास। रमेशः प्रथमं पुरस्कारं लेभे। सर्वे छात्राः "भाग्यं फलति सर्वत्र न विद्या न च पौरुषम् इति।"

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कथयन्तः रमेशस्य प्रशंसां चक्रिरे। सर्वे ते प्रसन्ना आसन्। किन्तु रमेशस्य मुखे विषादस्य रेखां अपश्यन्। सुबुद्धयः जानन्तोपि न कोपि तस्य दोषं उद्घाटयामास।

अन्येद्युः हरिः कक्ष्यायां काष्ठपिटकमेकं आनयामास। तस्मिन् लेखिनी, मषीपात्रं, शीशिका, पुस्तकादीनि च बहूनि पुरस्कारदेयानि वस्तूनि आसन्। स तस्य पिटकस्य ऊर्ध्वपुटे—"इदं रमेशाय सधन्यवादं पुरस्कृतं" इति लिखित्वा तस्मै प्रायच्छत्। अनेन हरिः असाधावपि साधुतां दर्शयामास।

रमेशोऽत्यन्तं ललज्जे। स परं हृदि दुःखं अनुबभूव। सोऽश्रुपूर्णनेत्रः हरिं गत्वा प्रोच्चैरूचे—मित्र! क्षमस्व मां; अपराद्धं मया तव। 'महात्मानोऽनुगृह्णन्ति भजमानान् रिपूनपि'। हरिस्तं चक्षमे। स परमानन्दमन्वभवत्। ततस्तौ मित्रे अभवताम। सज्जनाः क्षमाशीलाः परोपकारिणश्च भवन्तीति कवयो वदन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥

(बालसंस्कृतम्)

பதங்கள்

ब्राह्मः - சொன்னான்
शृणुत - கேளுங்கள்
शनौ - சனிக்கிழமையில்
पारितोषिकम् - பரிசு-மானம்
उपस्थापयन्तु - கொண்டுவர வேண்டும் (வைக்க வேண்டும்
एव - மேலான
धनिनं - தனம் உடையவன்
गच्छते - அடையப் போகிறான்
सोढ्वा-பொறுத்துக்கொண் டான்
त्वरितैः- சீக்கிரமான
निवर्तयामास - திருப்பிக் கொடுத்தான்
इन्दुवासरे - சந்திரனின் தினத்தில் திங்கள்கிழமை யில்
उपातिष्ठत - கூடிற்று
आदयामास - தெரி வித்தார்
उद्घाटयामास - வெளி யிட்டான் (திறந்தான்)
कार्पिटकम् - மரத்திலு லான கூடை
अनुभूय - அநுபவித்தான்
ललज्जे - வெட்கமடைந்தான்
बभ्रमे - பொறுத்தான் (மன்னித்தான்)
अन्वभवत् - அநுபவித் தான்

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் - 2

॥ रामेण कुशलवपरिग्रहः ॥

अथ प्राचेतसोपज्ञं रामायणमितस्ततः ।
मैथिलेयौ कुशलवौ जगतुर्गुरुचोदितौ ॥ १ ॥
वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किन्नरस्वनौ ।
किं तद्येन मनोहर्तुमलं स्यातां न शृण्वताम् ॥ २ ॥
रूपे गीते च माधुर्यं तयोस्तज्ज्ञैर्निवेदितम् ।
ददर्श सानुजो रामः शुश्राव च कुतूहली ॥ ३ ॥
तद्गीत श्रवणैकाग्रा संसदश्रुमुखी बभौ ।
हिमनिष्यन्दिनी प्रातर्निवातेव वनस्थली ॥ ४ ॥
वयो वेषविसंवादि रामस्य च तयोस्तदा ।
जनता प्रेक्ष्य सादृश्यं नाक्षिकंपं व्यतिष्ठत ॥ ५ ॥
उभयोर्न तथा लोकः प्रावीण्येन विसिस्मिये ।
नृपतेः प्रीतिदानेषु वीतस्पृहतया यथा ॥ ६ ॥
गेये केन विनीतौ वां कस्य चेयं कृतिः कवेः ।
इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम् ॥ ७ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ सावरजो रामः प्राचेतसमुपेयिवान् ।
ऊरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत् ॥ ८ ॥
स तावाख्याय रामाय मैथिलेयौ तदात्मजौ ।
कविः कारुणिको वव्रे सीतायाः सम्परिग्रहम् ॥ ९ ॥
तात शुद्धा समक्षं नः स्नुषा ते जातवेदसि ।
दौरात्म्याद्रक्षसस्तां तु नात्रत्याः श्रद्दधुः प्रजाः ॥
ताः स्वचारित्र्यमुद्दिश्य प्रत्याययतु मैथिली ।
ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया ॥ ११ ॥
इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिः ।
शिष्यैरानाययामास स्वसिद्धि नियमैरिव ॥ १२ ॥

(रघुवंश काव्यम्)

முக்கிய பதங்கள்

1. प्राचेतसोपयम् - (प्राचेतस + उपयम्)
வால்மீகியினல் முதலாக அறியட்டது.
(उपज्ञा ज्ञानमाद्यं स्यात्)
2. जगतुः - பாடினர் (இருவர்)
3. किन्नरस्वनौ - கின்னரர் களின் குரல் போன்ற இனிமைக் குரலுடைய
4. विलंबादि விபரீதமான
5. नाक्षिकस्पम् - இமைக் கொட்டாமை
6. प्यसिद्धि-உட்கர்ந்தரன்

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

7. विस्मिये - ஆச்சரியமடைந்தது.
8. सावरजः - (अवरजेन सहितः) இளையசகோதரனுடன் கூடின
9. वव्रे - ஸ்வீகரித்தார்
10. जातवेदसि- அக்நியில்
11. अदधुः - நம்பிக்கைக் கொண்டனர்
12. प्रयाययतु - நம்பிக்கை ஏற்படச் செய்யட்டும.
13. प्रतिपत्स्ये - ஸ்வீகரித்துக்கொள்ளுவேன்
14. प्रतिश्रुते - பிரதிக்ஞை செய்தபொழுது
15. आनाययांमास - அழைத்துவரச்செய்தார்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 8

ஐந்தாவது கணத்தைச் சார்ந்த வினைச் சொற்கள் (பரஸ்மைபதீ)

1 आप् – ஸாதிக்க, பூர்த்தி செய்ய

आप्नोति आपआप्ता आप्स्यति

2 शक् – சக்தி உள்ள

शक्नोति शशाक शक्ता शक्ष्यति

3 राध् – அடைதல்

राध्नोति रराध राद्धा रात्स्यति

4 दु – கஷ்டப்படுத்த

दुनोति दुदाव दोता दोष्यति

5 तृप् – திருப்திசெய்தல்

तृप्नोति ततर्प तर्पिता तर्पिष्यति

6 आप – அடைய

आप्नोति आप आप्ता आप्स्यति

लट् – நிகழ்காலம்

राध्नोति राध्नुतः राध्नुवन्ति – प्रथमपुरुष

राध्नोषि राध्नुथः राध्नुथ – मध्यम

राध्नोमि राध्नुवः राध्नुमः – अत्तम पुरुष

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लोट् आशीर्वादम्

राध्नोतु राध्नुतां राध्नुवन्तु – प्रथम पुरुष
राध्नुहि राध्नुतं राध्नुत – मध्यम ,,
राध्नवानि राध्नवाव राध्नवाम – उत्तम ,,

लङ् இறந்த காலம்

अराध्नोत् अराध्नुतां अराध्नुवन् – प्रथम
अराध्नोः अराध्नुतं अराध्नुत – मध्यम
अराध्नुवम् अराध्नुव अराध्नुम – उत्तम

लिङ् (கட்டளை)

राध्नुयात् राध्नुयातां राध्नुयुः – प्रथम
राध्नुयाः राध्नुयातं राध्नुयात – मध्यम
राध्नुयां राध्नुयाव राध्नुयाम – उत्तम

(उभयपदी धातुः)

1 चि சேர்க்க, கூட்ட–

चिनोति चिकाय चिचाय चेता
चिनुते चिक्ये चिच्ये
चेतिष्यति
चेतिष्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2 धु – அசைத்தல்

धुनोति दुधाव धोता धोष्यति

धुनुते दुधुवे धोष्यते

3 वृ – வரித்தல்

वृणोति ववार वरिता वरिष्यति

वृणुते वव्रे वरीता वरिष्यते

4 सु – பிழிய

सुनोति सुषाव सोता

सुनुते सुषुवे सोष्यति सोष्यते

5 स्तृ - பரப்புதல்

स्तृणोति तस्तार स्तर्ता स्तरिष्यति

स्तृणुते तस्तरे स्तरिष्यते

நியமம்—

மேற்கண்ட வினைச்சொற்களைக் கொண்டு ஸம்ஸ்கிருதத்தில் வாக்கியங்களை எழுதி பழகிக் கொள்ளவும். ஐந்தாம் கணத்தின் விகரணமாவது "நு" (नु) என்பது விகரணப்ரத்யயம் வினைக்கும் ப்ரத்யயத்துக்கும் இடையில் சேற்கப்பட வேண்டும். (உ-ம்) सु+नु+ति=सुनोति இவ்வாறே மற்ற ரூபங்களையும் பார்த்துக் கொள்ள வேண்டும்!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 4

ஏழாவது கணத்தைச்சார்ந்த வினைச் சொற்கள்

நியமம்.—இந்தகணத்தின் விகரணம் 'ந' என்பது. இந்த விகரணம் தாதுவினுடைய கடைசி உயிரெழுத்துக்குப்பிறகும் கடைசி மெய்யெழுத்துக்கு முன்பாகவும் சேர்க்கப்பட வேண்டும்.

(உ - ம்) विष्-

विष् - அறைத்தல்

वि. न. ष्. ति = विष् + न + ति विनष्टि

1 हिंस् - ஹிம்ஸிக்க, சொல்ல

हिनस्ति जिहिंस हिंसिता

हिंसिष्यति

2 वृज् - தள்ள, ஒதுக்க

वृणक्ति । ववर्ज । वर्जिता । वर्जिष्यति ।

भञ्ज् : ஒடிக்க

भनक्ति बभञ्ज भङ्क्ता

भङ्क्ष्यति

4 कृत् - அறுக்க.

कृणत्ति चकर्त कर्तिता कर्तिष्यति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5 अञ्ज् - நினைக்க, பூச

अनक्ति आनक् अङ्क्ता अञ्जिता

अञ्जिष्यति अङ्क्ष्यति

ரஸய पद வினைச் சொற்கள்

1 रुध् - தடுத்தல்

रुणद्धि, रुन्धे रुरोध, रुरुधे

रोद्धा रोत्स्यति, रोत्स्यते

2 रिच् - காலி செய்தல்

रिणक्ति, रिङ्क्ते रिरेच, रिरिचे

रेक्ता रेक्ष्यति, रेक्ष्यते ॥

3 युज् - சேர்த்து வைத்தல்

युनक्ति, युङ्क्ते युयोज, युयुजे

योक्ता योक्ष्यति, योक्ष्यते

4 भुज् - சாப்பிடுதல் (அனுபவித்தல்)

भुनक्ति, भुङ्क्ते भुभोज, भुभुजे

भोक्ता, भोक्ष्यत, भोक्ष्यते

5 भिद् - பிளப்புதல்

भिनत्ति, भिन्ते बिभेद, बिभिदे भेत्ता

भेत्स्यति, भेत्स्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

6 छिद् - வெட்டுதல்

छिनत्ति, छिन्ते चिच्छेद, चिच्छिदे छेत्ता
छेत्स्यति, छेत्स्यते ।

மேலே கொடுக்கப்பட்ட வினைச் சொற்களை உபயோகித்து வாக்கியங்களை எழுதி பழக்கம் கொள்ளல் வேண்டும்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 6

। स्वामिभक्ता पन्नाधात्री ।

ஓர் அங்க நாடகம்

प्रथमदृश्यम् ।

[रात्रिसमयो वर्तते । पर्यङ्के उदयसिंहः स्वपन् अस्ति । पन्नाधात्री स्वशिशुं क्रोडे आदाय पर्यङ्कस्य समीप एव उपविष्टा विचारयति ।]

उदयसिंहः—(कुस्वप्नमिव दृष्ट्वा उत्थाय) अम्ब ! अम्ब ! यदि सर्वकाराः श्वः प्रभाते महाराजं विक्रमं न मुक्तं करिष्यन्ति, तदा किं भविष्यति ?

पन्ना—अरे ! किं त्वं इदानीमपि न सुप्तः ! महाराजः श्वः अवश्यं मुक्तः भविष्यति । यदि अधिकं जागरिष्यसि, तर्हि अस्वस्थो भविष्यसि । निश्चिन्तं स्वपिहि तावत् ।

उदयसिंहः—(सन्तोषं प्राप्य) यदाज्ञापयसि अम्ब ! तदहं स्वीकरोमि । एवमेव दुःस्वप्नः आयातः आसीत् । स्वापिमि अहम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

[उदयसिंहः प्रगाढं स्वपिति। सहसा राज-प्रासादात् रोदनध्वनिः श्रूयते। पन्ना विस्रब्धा भवति। वंशपात्रे उच्छिष्टपत्रावलीः हस्ते च मार्जनीं दधानः राजकीयः महत्तरः बारी उपतिष्ठति।)

बारी—राम! राम!! सर्वनाशः सञ्जातः, धात्रि अम्ब! सर्वनाशः। दुष्टवनवीरः कारागारे महाराजं विक्रमं हत्वा उदयमपि हन्तुं इत एव आयाति। हा भगवन्!

[वंशपात्रं भूमौ निधाय स्वयमपि उपविशति)

पन्ना—(साश्चर्यं) हं हं बारिन्! अद्य ते किं सञ्जातम्? किं मदिरा तु अधिकं पीता? कथमित्थ अनर्गलं प्रलपसि?

बारी—नहि न हि धात्रि! विश्वसिहि माम्। अहं सर्वं सत्यं वदामि। त्वर्यताम् त्वर्यताम्। राज-कुमारस्य रक्षोपायं कुरुष्व।

पन्ना—(व्याकुलाभूत्वा, किन्तु समये धैर्यं न त्यजन्ती, स्वगतम्) हा! दीननाथ! किमिदं श्रृणोमि?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्वमेव रक्ष एनं बालम्। (प्रकटम्) वारिन्। यदि एवमेव, तर्हि उदयं यथाकथमपि दुर्गात् बहिः नयस्व।

वारी—धात्रि अम्ब! कुमारं न प्राप्य वनवीरः त्वां हनिष्यति। कुमारोऽपि त्वां विना कथं जीविष्यति? तस्य रक्षां कः करिष्यति?!

पन्ना—आम्, वदसि तु सत्यमेव; किन्तु, न हि अहं तस्य मार्गे विघ्नं उपस्थापयिष्यामि। कृपाणं आहत्य शतशः भित्वा तं दूरे प्रक्षेप्स्यामि। कथय सावित्र्या यमपाशात् स्वस्वामी रक्षितः, किमहं इयती अबला अस्मि, या मनुष्यहस्तादपि आत्मस्वामिपुत्रं रक्षितुं न शक्ष्यामि। वनवीरः दयालुर्वर्तते। सः श्रद्दधाति मयि। तस्मात् उदयस्य प्राणभिक्षां याचिष्ये।

वारी—नहि नहि अम्ब! न स तादृशः सरलो वर्तते। राजमुकुटधारणेन सहैव तदीयं हृदयमपि परिवर्तितम्। अतः उपायः चिन्त्यताम् त्वरितम्॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पन्ना—(स्वगतम्) हा जगदीश्वर! किं चितौड-वंशस्य एवमेव विनाशः भविष्यति? किंचित् रक्षोपायं तु दर्शय। इयं अबला स्वबलिदानेन अपि स्वामिपुत्रं रिरक्षिषति। (प्रकाशम्) वारिन्! कथितं तु मया उदयं यथा कथमपि दुर्गात् बहिः सावधानं नय।

वारी—अम्ब! स एव प्रश्नः! बनवीराय किं उत्तरं दास्यसि?

पन्ना—सर्वं निर्णीतं मया। तस्य अक्ष्णोः धूलिं प्रक्षेप्स्यामि।

वारी—(सोत्कण्ठं) कथमिदं अम्ब!

पन्ना—(चन्दनं प्रतिवीक्ष्य) उदयस्थाने कमपि शाययित्वा।

वारी (तीव्रं जिज्ञासया) कं जनं? स्पष्टं किं न वदसि?

पन्ना—अरे इदानीमपि किं न ज्ञातम्? एनं चन्दनं, प्रियं चन्दनम्!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वारी—(साश्चर्यं सविषादंच) अहो! धन्या असि देवी! धन्या त्वम्! स्वामिनः ऋणस्य एवं प्रतिशोधः। त्वां प्रणमामि अम्ब! त्वं प्रत्यहं प्रातर्वन्दनीया असि!

पन्ना—अलम्, अलम्! अधिकं मा ब्रूहि। समयः व्यत्येति। यदि उदयः रक्षणीयः तर्हि तं इतः श्रीघ्रं बहिर्नयस्व। अहं आगच्छामि। प्रतीक्षस्व, माम्। गृहाण उदयम्। तव वंशपात्रे एव स्थापयामि। (वंशपात्रात् उच्छिष्टपत्रावलिं निरस्यार्य तत्स्थाने एकं वस्त्रं विस्तृणाति)। ततः सावधानतया उदयं पर्यङ्कात् उत्थाप्य वंशपात्रे स्थापयति, उच्छिष्टपत्रावलिं च यथापूर्वं स्थापयति।

वारी—तर्हि चलामि अम्ब!

पन्ना—(आत्मानं दृढं कृत्वा) आम्, आम्, शीघ्रातिशीघ्रम्। मे मनसः परिवर्तनात्,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वनवीरस्य च इह आगमनात् पूर्वमेव । शुभाः सन्तु ते मार्गाः ।

वारी—यदाज्ञापयति अम्ब ! परमेश्वरः तव रक्षां करोतु ।

(वंशपात्रं पन्नायाः सहायतया स्वशिरसि निधाय बहिः निर्गच्छति ।)

द्वितीय दृश्यम्

[पन्ना चन्दनं क्रोडात् शनैरुत्थाप्य पर्यङ्के शनैः स्वापयति, ततः प्रेम्णा तं परिचुम्ब्य वस्त्रेण आच्छादयति]

वनवीरः—[रक्तरञ्जितकृपाणहस्तः अन्तः प्रविश्य सरोषं) पन्ने, पन्ने ! निर्दिश उदयः कुत्र अस्ति ?

पन्ना—(पादयोः निपत्य) वनवीर ! त्वं तु उदयस्य संरक्षकः असि । किंचित् पापपुण्ये तु विचारय ।

वनवीरः—नहि नहि ! विलम्बं मा कुरु ! किं शत्रुवधः क्षत्रियस्य कृते पुण्यं न वर्तते ? किं मातुः आज्ञापालनं पुत्रस्य धर्मः नास्ति ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पन्ना—(सावेशं उत्थाय वनवीरहस्तात् कृपाणं आहर्तुं प्रयतमाना) मदोन्मत्त प्राणिन्! किं प्रलपसि? त्वं पथभ्रष्टोऽसि। अहं त्वदीये कार्ये विघ्नं आनेष्यामि।

वनवीरः—(भर्त्सयन् ताम्) पन्ने। चलचल, दूरं अपसर। अन्यथा त्वामपि यमराज-गृहिणीं करिष्यामि। (पर्यङ्कं प्रतिवीक्ष्य) किमयमेव उदयः? (इति कृपाणं उक्षोलयति।)

पन्ना—(वनवीरं पृष्ठतः निगृह्णन्ती) तिष्ठ तिष्ठ रे निर्दय! अधुना अपि सुधारय स्वलोकम्। पश्य। कृपाणः किं सङ्केतयति? अयं कथयति उच्चैः भूत्वा—'बिभेहि! (आकाशं निर्दिश्य) तस्मात् बिभेहि'!!

वनवीरः—नहि नहि, अयं उपदिशति "आत्मान-मुन्नेतुं अयमेव मार्गः"। इति॥

(वनवीरः झटिति आत्मानं पन्नाया बाहुपाशात्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उन्मोच्य उदयस्य अग्रे चन्दनस्य वधं करोति।)

[illegible]—हा राक्षस !

(भूमौ निपत्य अचेतना सञ्जाता)

पटाक्षेपः

[लेखकः—श्रीनारायण शास्त्री काङ्कर, जयपुरम्]

பதங்கள்

उदारः - ஸ்தார்.
स्थगिहि - தாங்கு
विक्लवा - நிம்மதியாக
भर्त्सनम् - தட்டுத்தடங்கலி
ன்றி
प्रक्षेप्स्यामि - வெளியில்
போட்டு விடுவேன்
रिरक्षिषति - காப்பாற்ற
விரும்புகிறாள்.
विस्तृणाति - பரப்புகிறான்.
विभिहि - பயப்படு
उन्मोच्य - விடுவித்துக்
கொண்டு
वंशपात्रे- மூங்கல் கூடையில்
मार्जनी - துடப்பம்.
महक्षरः - பெரிய
विश्वसिहि - நம்பிக்கைக்
கொள்
श्रद्धाति - நம்புகிறான்.
प्रतिशोधः - திருப்பித்தரல்.
(பதலடி)
उक्षोलयति - வீசுகிறான்
झटिति - சிக்ரமாக
निपत्य - விழுந்து.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 6

॥ रामाज्ञया लक्ष्मणः सीतां वने विजहाति ॥

स लक्ष्मणं लक्ष्मणपूर्वजन्मा विलोक्य लोकत्रयगीत-
कीर्तिः ।
सौम्येति चाभाष्य यथार्थभाषी स्थितं निदेशे पृथगादि-
देश ॥ १ ॥

प्रजावती दोहदशंसिनी ते तपो वनेषु स्पृहयालुरेव ।
स त्वं रथी तद्व्यपदेशनेयां प्रापय्य वाल्मीकिपदं
त्यजैनाम् ॥ २ ॥

स शुश्रुवान् मातरि भार्गवेण पितुर्नियोगात् प्रहृतं
द्विषद्वत् ।
प्रत्यग्रहीदग्रजशासनं तत् आज्ञा गुरूणां ह्यविचार-
णीया ॥ ३ ॥

सा नीयमाना रुचिरान् प्रदेशान् प्रियंकरो मे प्रिय
इत्यनन्दत् ।
नाबुद्ध, कल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्र वृक्षम्॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गुरोर्नियोगाद्वनितां वनान्ते साध्वीं सुमित्रातनयो विहाय।
गङ्गां निषादाहृतनौर्विशेषस्ततार सन्ध्यामिव सत्यसन्धः॥
अथ व्यवस्थापितवाक् कथंचित् सौमित्रिरन्तर्गतबाष्प-
कण्ठः।
औत्पातिको मेघ इवोष्मवर्षं महीपतेः शासन मुज्जगार॥
सा लुप्तसंज्ञा न विवेद दुःखं प्रत्यागतासुः समत-
प्यतान्तः।
तस्याः सुमित्रात्मजयत्नलब्धो मोहादभूत्कष्टतरः प्रबोधः॥
आश्वास्य रामावरजः सतीं तामाख्यात वाल्मीकिनिके-
तमार्गः।
निशम्य मे भर्तृनिदेशरौक्ष्यं देवि क्षमस्वेति बभूव नम्रः॥
सीता तमुत्थाप्य जगाद वाक्यं प्रीतास्मि ते वत्स
चिराय जीव।
बिडौजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थं परवानसि स्वम्॥
वाष्पस्त्वया मद्वचनात्सराजा वह्नौ विशुद्धामपि
यत्समक्षम्।
मां लोकवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं
कुलस्य॥ १०॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

निशाचरोपप्लुतभर्तृकाणां तपस्विनीनां भवतः प्रसादात्।
भूत्वा शरण्या शरणार्थमन्यं कथं प्रपत्स्ये त्वयिदीप्यमाने॥
साहं तपः सूर्यनिविष्टदृष्टिः ऊर्ध्वं प्रसूतेः चरितुं यतिष्ये।
भूयो यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः॥

பதங்கள்

आदिदेश - கட்டளையிட்டார்.
आपप्य - அடைவிப்பித்து
ततार - தாண்டினார்.
सत्यसन्धः - ஸத்யமான ப்ரதிக்ஞையைக் கொண்டவன்
विदेह - அறிந்தாள்
निदेशम् - வீடு
यतिष्ये - யத்னம் செய்கிறேன்
विप्रयोगः - பிரிவு
जननान्तरेऽपि - மறுபிறவியிலும்

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ पुत्रवियोगेन दशरथस्य शोकावेगः ॥ -

काञ्चुकीयः (सर्वतो विलोक्य) अहो नु खलु राम-निर्गमनदिनादारभ्य शून्यैवेयं अयोध्या संलक्ष्यते। यतः—

नागेन्द्रा यवसाभिलाषविमुखाः सास्रेक्षणा वाजिनः
हेषा शून्यमुखाः सवृद्धवनिता बालाश्च पौरा जनाः।
त्यक्ताहारकथाः सुदीनवदनाः क्रंदन्त उच्चैर्दिशा
रामो याति यया सदाऽसहजस्तामेव पश्यन्त्यमी ॥

तावदहमपि महाराजस्य समीपमर्ती भविष्यामि ॥

(परिक्रम्यावलोक्य) अथे अयं महाराजः महा-देव्या सुमित्रया च सुदुःसहमपि पुत्रविरहसमुद्भवं शोकं निगृह्य आत्मानमेव संस्थापयन्तीभ्यां अन्वास्यमा-नस्तिष्ठति। कष्टा खल्ववस्था वर्तते। एष एष महाराजः—

पतत्युत्थायचोत्थाय हाहेत्युच्चैस्तपन् मुहुः।
दिशं पश्यति तामेव यया यातो रघूद्वहः ॥

(ततः प्रविशति यथानिर्दिष्टो राजा)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजा—हा वत्स राम जगतां नयनाभिराम ।
हा वत्स लक्ष्मण सलक्षणसर्वगात्र ॥
हा साध्वि मैथिलि परिस्थितचित्तवृत्ते ।
हा हा गताःकिल वनं बत मे तनूजाः ॥
चित्रमिदं भोः यद्भ्रातृस्नेहात् पितरि विमुक्तस्नेहमपि तावल्लक्ष्मणं द्रष्टुमिच्छामि । वधु वैदेहि—
रामेणापि परित्यक्तः लक्ष्मणेन च गर्हितः ।
अयशोभाजनं लोके परित्यक्तस्त्वयाप्यहम् ॥
पुत्रराम, वत्सलक्ष्मण, वधु वैदेहि, प्रयच्छत मे प्रतिवचनं पुत्रकाः । शून्यमिदं भोः ! न मे कश्चित्प्रतिवचनं प्रयच्छति । कौसल्यामातः क्वासि ?
सत्यसन्ध जितक्रोध विमत्सर जगत्प्रिय ।
गुरुशुश्रूषणेयुक्त प्रतिवाक्यं प्रयच्छ मे ॥
हा क्वासौ सर्वजनहृदयनयनाभिरामो रामः । क्वासौ मयि गुर्वनुवृत्तिः । क्वासौ शोकार्तेष्वनुकम्पी । क्वासौ तृणवदवगणितराज्यैश्वर्यः । पुत्र राम वृद्धं पितरं मां परित्यज्य किमसंबद्धेन धर्मेण ते कृत्यम् ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हा धिक कष्टम् ।

सूर्य इव गतो रामः सूर्य दिवस इव लक्ष्मणोऽनुगतः ।
सूर्यदिवसावसाने छायेव न दृश्यते सीता ॥

(ऊर्ध्वमवलोक्य) भोः कृतान्तहतक !

अनपत्या वयं रामः पुत्रोऽन्यस्य महीपतेः ।
वने व्याघ्री च कैकेयी तथा किं न कृतं त्रयम् ॥

कौसल्या—(सरुदितम्) अलमिदानीं महाराजोऽति-
मात्रं संतप्य परवशमात्मानं कर्तुम् । ननु सा
तौ च कुमारौ महाराजस्य समयावसाने
प्रेक्षितव्या भविष्यन्ति ।

राजा—का त्वं भोः ?

कौसल्या—अस्निग्धपुत्रप्रसविनी खल्वहम् ।

राजा—कौसल्ये सारवती खल्वसि । त्वया हि खलु
रामो गर्भे धृतः ।
अहं हि दुःखमत्यन्तं असह्यं ज्वलनोपमम् ।
नैव सोढुं न संहर्तुं शक्नोमि मुषितेन्द्रियः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(सुमित्रां विलोक्य) इयमपरा का ?

कौसल्या—महाराज-वत्सलक्ष्मण (इत्यर्धोक्ते)

राजा—(सहसोत्थाय) कासौ कासौ लक्ष्मणः ? न दृश्यते भोः कष्टम् ।

(देव्यौ ससंभ्रममुत्थाय राजानमवलम्बेते)

कौसल्या—महाराज वत्सलक्ष्मणस्य जननी सुमित्रेति वक्तुं मयोपक्रान्तम् ।

राजा—अयि सुमित्रे ! तवैव पुत्रः सत्पुत्रो येन नक्तंदिवं वने । रामो रघुकुलश्रेष्ठश्छाययेवानुगम्यते ॥

(प्रविश्य)

काञ्चुकीयः—जयतु महाराजः । एष खलु तत्रभवान् सुमन्त्रः प्राप्तः ।

राजा—(सहर्षमुत्थाय) अपि रामेण ;

काञ्चुकीयः—न खलु, रथेन ।

राजा—कथं कथं रथेन केवलेन

(इति मूर्च्छितः पतति)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

देव्यौ—महाराज-महाराज! समाश्वसिहि, समाश्वसिहि।

(गात्राणि परामृशतः)

काञ्चुकीयः—भोः कष्टम्। ईदृग्विधाः पुरुषविशेषाः ईदृशीं आपदं प्राप्नुवन्तीति विधिरनतिक्रमणीयः। महाराज समाश्वसिहि समाश्वसिहि।

राजा—(किंचित् समाश्वस्य।) बालाके! सुमन्त्रः एक एव ननु प्राप्तः।

काञ्चुकीयः—महाराज अथ किम्?

राजा—कष्टं भो :—

शून्यः प्राप्तो यदि रथः भग्नो मम मनोरथः।
नूनं दशरथं नेतुं कालेन प्रेषितो रथः॥

तेन हि शीघ्रं प्रवेश्यताम्।

काञ्चुकीयः—यदाज्ञापयति महाराजः।

राजा - धन्याः खलु वने वाता तटाकपरिवर्तिनः।
विचरन्तं वने रामं ये स्पृशन्ति यथासुखम्॥

(प्रतिमा नाटकम्)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பதங்கள்

ईक्षते - காணப்படுகிறது.
नागेन्द्राः - உயர்ந்த யானைகள்
वाजिनः - குதிரைகள்
तनूजाः - பிள்ளைகள்
प्रतिवचनम् - பதில்
अवनतिः - பொருட்படுத்தாத
समयः - பிரதிக்ஞை
समाश्वसिहि - ஆச்வாஸம் கொள்
यथासुखम् - சுகமாக
काम्बुकीयः - கஞ்சுகி (வேலி ஆள்)
परामृशतः - தொடுகின்றன (த்விவசனம்)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ पञ्चवटी निवासाश्रमः ॥

रामः लक्ष्मणं वदति—

आगताः स्म यथोद्दिष्टं अमुं देशं महर्षिणा ।
अयं पञ्चवटीदेशः सौम्य, पुष्पितपादपः ॥ १ ॥
सर्वतश्चार्यतां दृष्टिः कानने निपुणो ह्यसि ।
आश्रमः कतरस्मिन्नो देशे भवति सम्मतः ॥ २ ॥
वनरामण्यकं यत्र जलरामण्यकं तथा ।
सन्निकृष्टं च यत्र स्यात् समित्पुष्पकुशोदकम् ॥ ३ ॥
रमते यत्र वैदेही त्वमहं चैव लक्ष्मण ।
तादृशो दृश्यतां देशः सन्निकृष्टजलाशयः ॥ ४ ॥
स तं रुचिरमाक्रम्य देशमाश्रमकर्मणि ।
हस्तं गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत् ॥ ५ ॥
अयं देशः समं श्रीमान्पुष्पितैस्तरुभिर्वृतः ।
इहाश्रमपदं सौम्य यथावत्कर्तुमर्हसि ॥ ६ ॥
इयमादित्यसङ्काशैः पद्मैस्सुरभिगन्धिभिः ।
अदूरे दृश्यते रम्या पद्मिनी पद्मशोभिता ॥ ७ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ।
दृश्यं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता ॥ ८ ॥

मयूरनादिता रम्याः प्रांशवो बहुकन्दराः ।
दृश्यन्ते गिरयः सौम्य फुल्लैस्तरुभिरावृताः ॥ ९ ॥

एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ।
अचिरेणाश्रमं भ्रातुः चकार, सुमहाबलः ॥ १० ॥

रामो दृष्ट्वा कृतं सौम्यं आश्रमं सह सीतया ।
तस्मिन्देशे बहुफले न्यवसत्सुसुखं सुखी ॥ ११ ॥

कंचित् कालं स धर्मात्मा सीतया लक्ष्मणेन च ।
अन्वास्यमानो न्यवसत् स्वर्गलोके यथाऽमरः ॥ १२ ॥

(रामायणम्)

பதங்கள்

सदृशः - உசிதமான
सन्निकृष्टम् - சமீபமான
सुरभिः - நறுமணம்
फलैः - அருகில்
पद्मिनी - தாமரை குடை
प्रांशवः - உயர்ந்த
परवीरहा - சத்ருவைக் கொல்பவன்
न्यवसत् - வசித்தார்.
अन्वास्यमानः - கூடனவராக
अमरः - தேவன்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ वेणीसंहारः ॥

[ततः प्रविशति गदापाणिः क्षतजसिक्त सर्वाङ्गः भीमसेनः]

भीमसेन :—(उद्धतं परिक्रामन्) भो भोः समन्तपञ्च-कसञ्चारिणः सैनिकाः कोऽयमावेगः कथयन्तु भवन्तः कस्मिन्नुद्देशे पाञ्चाली तिष्ठति ।

द्रौपदी—(लब्धसञ्ज्ञा) परित्रायतां परित्रायतां महाराजः ।

कञ्चुकी :—देवि पाण्डुस्नुषे उत्तिष्ठोत्तिष्ठ ! सम्प्रति झटिति चिताप्रवेश एव श्रेयान् ।

द्रौपदी :—(सहसोत्थाय) कथं न सम्भावयाम्यद्यापि चितासमीपम् ।

युधिष्ठिरः :—कः कोऽत्रभोः । सनिषङ्गंधनुरुपनय । कथं न कश्चित्परिजनः ? भवतु । बाहुयुद्धे-नैव दुरात्मानं गाढमालिङ्ग्य ज्वलनमभिपात-यामि । (परिकरं बध्नाति)

कञ्चुकी :—देवि पाण्डुस्नुषे संयम्यन्तां इदानीं नयनोपरोधिनो दुःशासनावकृष्टा मूर्धजाः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्तमिता संप्रति प्रतीकाराशा। चितासमी-
पमेव द्रुततरं सम्भावय।

युधिष्ठिर :—कृष्णे न खल्वनिहते तस्मिन्दुरात्मनि
दुर्योधने संहर्तव्याः केशाः॥

भीमसेन :—पाञ्चालि न खलु मयिजीवति संहर्तव्या
दुःशासनविलुलिता वेणिः आत्मपाणिना।
तिष्ठतु तिष्ठतु स्वयमेवाहं संहरामि।

द्रोपदी :—(भयादपसर्पति)

भीमसेन :—तिष्ठ तिष्ठ भीरु! क्वाधुना गम्यते?
(इति केशेषु ग्रहीतुमिच्छति)

युधिष्ठिर :—(वेगात् भीममालिङ्ग्य) दुरात्मन् भीमा-
र्जुनशत्रो सुयोधनहतक,
आशैशवादनुदिनं जनितापराधो
मत्तो बलेन भुजयोर्हतराजपुत्रः।
आसाद्य मेऽन्तरमिदं भुजपञ्जरस्य
जीवन् प्रयासि न पदात्पदमद्य पाप॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भीमसेन :—अये कथमार्यः सुयोधनशङ्कया क्रोधाग्निर्दयमालिङ्गति ।

कञ्चुकी :—(उपसृत्य सहर्षम्) महाराज वञ्च्यसे । अयं खल्वायुष्मान् भीमसेनः सुयोधनक्षतजारुणीकृतशरीराम्बरः दुर्लक्ष्यव्यक्तिः । अलमधुना सन्देहेन ।

चेटी :—(द्रौपदीमालिङ्ग्य) देवि निर्वर्त्यताम् निर्वर्त्यताम् । एष खलु पूरितप्रतिज्ञाभारः नाथस्ते वेणीसंहारं कर्तुं त्वामन्विष्यति ।

द्रौपदी—हञ्जे, किं मामलीकवचनै राश्वासयसि ।

युधिष्ठिरः—जनन्धर, किं कथयसि ?

नायमनुजद्वेषी दुर्योधनहतकः ।

भीमसेनः—देव, अजातशत्रो, भीमार्जुनगुरो ! कुतोऽद्यापि दुर्योधनहतकः । मया हि तस्य दुरात्मनः पाण्डुकुलपरिभाविनः—

भूमौ क्षिप्तं शरीरं निहतमिदमसृक्चन्दनाभं निजाङ्गे,
लक्ष्मीरार्ये निषण्णा चतुरुदधिपयःसीमया सार्धमुर्व्या ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भृत्या मित्राणि, योधाः कुरुकुलमखिलं दग्धमेत द्वणाग्नौ,
नामैकं यद्ब्रवीषि क्षितिप तदधुना धार्तराष्ट्रस्य शेषम्॥

युधिष्ठिरः—(वैरं मुक्त्वा भीममवलोकयन्नश्रूणि प्रमार्जयति)

भीमसेनः—(पादयोः पतित्वा) जयत्वार्यः।

युधिष्ठिरः—वत्स, बाष्पजलान्तरितनयनत्वान्न पश्यामि ते मुखचन्द्रम्।
तत्कथय कश्चित् जीवति भवान् समं किरीटिना!

भीमसेनः—विहतसकलरिपुपक्षे नराधिपे जीवति भीमोऽर्जुनश्च।

युधिष्ठिरः—किमपरमवशिष्टम्?

भीमसेनः—आर्य सुमहदवशिष्टम्। संयच्छामि तावदनेन सुयोधन शोणितोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम्।

युधिष्ठिरः—सत्वरं गच्छतु भवान्। अनुभवतु तपस्विनी वेणीसंहारमहोत्सवम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भीमसेन :—(द्रौपदीमुपसृत्य) देवि पाञ्चालराजतनये दिष्ट्या वर्धसे रिपुकुलक्षयेण। अलमलमेवं विधमालोक्य त्रासेन। भवति वेदितव्ये याज्ञसेनि।

द्रौपदी—आज्ञापयतु नाथः।

भीमसेनः—स्मरति भवती यत्तन्मयोक्तम्?

द्रौपदी—नाथ न केवलं स्मरामि अनुभवामि च नाथस्य प्रसादेन।

भीमसेन :—(वेणीमवधूय) भवति, संयम्यतामिदानीं धार्तराष्ट्रकुलकालरात्रिर्दुश्शासनविलुलितेयं वेणी।

द्रौपदी :—नाम विस्मृतास्म्येतं व्यापारम्। नाथस्य प्रसादेन पुनरपि शिक्षिष्ये।

चेटी :—(वेणीं बध्नाति।

(नेपथ्ये)

महासमरानलदग्धशेषाय स्वस्ति भवतु राजन्यकुलाय।
क्रोधान्धैर्यस्य मोक्षात्क्षतनरपतिभिः पाण्डुपुत्रैः कृतानि।
प्रत्याशं मुक्तकेशान्यनुदिन मधुना पार्थिवान्तः पुराणि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कृष्णाथाः केशपाशाः कुपितयमसखो धूमकेतुः कुरूणां
दिष्ट्या बद्धः प्रजानां विरमतु निधनं स्वस्ति राज्ञां
कुलेभ्यः ॥

युधिष्ठिरः—देवि, एष ते वेणीसंहारः अभिनन्द्यते
नभस्तलसञ्चारिणा सिद्धजनेन ।

(वेणीसंहारम्)

பதங்கள்.

क्षतजः - ரக்தம். (புண்)
मूर्धजाः - தலைமயிர்.
संयमामि - கட்டுகிறேன்.
अभिष्यति - தேடப் போகிறான்.
अलीकवचनैः - பொய்யான வார்த்தைகளால்.
पराभविनः - தோல்வியை அடையப்போகிறவனு
டைய.

समाजंति - துடைக்கிறார்.
विलुलिता - அவிழ்க்கப்பட்ட.
विस्मृतास्मि மறந்தவளாகிறேன்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 10

எட்டாவது கணத்தைச்சார்ந்த விகிணச்சொற்கள்.

இந்த கணத்தின் விகரணப்ரத்யயம் उ என்பது, இது தாதுவுக்கும் ப்ரத்யயத்துக்கும் நடுவில் சேர்க்கப்பட வேண்டும்.

(2-ம்) तन् + उ—ति = तनोति

உபயபதீ

1 कृ—செய்கை

करोति । चकार । कर्ता । करिष्यति ।
कुरुते । चक्रे । करिष्यते ।

2 तन्—பரப்புதல், செய்தல்

तनोति । तनान । तनिता । तनिष्यति ।
तनुते । तेने । तनिष्यते ।

3 क्षि ஹிம்ஸித்தல்

क्षिणोति । चिक्षेण क्षेणिता । क्षेणिष्यति ।
क्षिणुते । चिक्षिणे । क्षेणिष्यते ।

4 षन् —கொடுத்தல்

सनोति । सषान । सनिता सनिष्यति ।
सनुते । सेने । सनिष्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. तनु (தொழிலம்)

(परस्मैपद) तनु—பரப்புதல், செய்தல்.

तनोति	तनुतः	तन्वन्ति	— प्रथम
तनोषि	तनुथः	तनुथ	— द्वितीय
तनोमि	तनुवः	तनुमः	— उत्तम
	(तन्वः)	(तन्मः)	

(आत्मनेपद)

तनुते	तन्वाते	तन्वते	प्रथम
तनुषे	तन्वाथे	तनुध्वे	मध्यम
तन्वे	तनुवहे	तनुमहे	उत्तम
	(तन्वहे)	(तन्महे)	

(परस्मैपद) तनु (ஏவல் வகை)

तनोतु	तनुताम्	तन्वन्तु	— प्रथम
तनु	तनुतम्	तनुत	— मध्यम
तनवानि	तनवाव	तनवाम	— उत्तम

(आत्मनेपद)

तनुताम्	तन्वाताम्	तन्वताम्	— प्रथम
तनुष्व	तन्वाथाम्	तनुध्वम्	— मध्यम
तनवै	तनवावहै	तनवामहै	— उत्तम

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 10

எட்டாவது கணத்தைச்சார்ந்த விகரணச்சொற்கள்.

இந்த கணத்தின் விகரணப்ரத்யயம் उ என்பது, இது தாதுவுக்கும் ப்ரத்யயத்துக்கும் நடுவில் சேர்க்கப்பட வேண்டும்.

(2-ம்) तन् + उ—ति = तनोति

உபயபதி

1 तॄ—செய்கை

करोति ।	चकार ।	कर्ता ।	करिष्यति ।
कुरुते ।	चक्रे ।		करिष्यते ।

2 तन्—பரப்புதல், செய்தல்

तनोति ।	तनान ।	तनिता ।	तनिष्यति ।
तनुते ।	तेने ।		तनिष्यते ।

3 क्षि ஹிம்ஸித்தல்

क्षिणोति ।	चिक्षेण	क्षेणिता ।	क्षेणिष्यति ।
क्षिणुते ।	चिक्षिणे ।		क्षेणिष्यते ।

4 षन् —கொடுத்தல்

सनोति ।	ससान ।	सनिता	सनिष्यति ।
सनुते ।	सेने ।		सनिष्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. तनु (பரப்பல்)

(परस्मैपद) तनु—பரப்புதல், செய்தல்.

तनोति	तनुतः	तन्वन्ति	— प्रथम
तनोषि	तनुथः	तनुथ	— द्वितीय
तनोमि	तनुवः	तनुमः	— उत्तम
	(तन्वः)	(तन्मः)	

(आत्मनेपद)

तनुते	तन्वाते	तन्वते	प्रथम
तनुषे	तन्वाथे	तनुध्वे	मध्यम
तन्वे	तनुवहे	तनुमहे	उत्तम
	(तन्वहे)	(तन्महे)	

(परस्मैपद) तनु (ஏவல் வடிவம்)

तनोतु	तनुताम्	तन्वन्तु	— प्रथम
तनु	तनुतम्	तनुत	— मध्यम
तनवानि	तनवाव	तनवाम	— उत्तम

(आत्मनेपद)

तनुताम्	तन्वाताम्	तन्वताम्	— प्रथम
तनुष्व	तन्वाथाम्	तनुध्वम्	— मध्यम
तनवै	तनवावहै	तनवामहै	— उत्तम

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तन (நீட்டுதல்)

(परस्मैपद)

अतनोत्	अतनुताम्	अतन्वन्	— प्रथम
अतनोः	अतनुतम्	अतनुत	— मध्यम
अतनवम्	अतनुव	अतनुम	— उत्तम
	(अतन्व)	(अतन्म)	

(आत्मने पद)

अतनुत	अतन्वाताम्	अतन्वत	प्रथम
अतनुथाः	अतन्वाथाम्	अतनुध्वम्	मध्यम
अतन्वि	अतनुवहि	अतनुमहि	उत्तम
	(अतन्वहि)	(अतन्महि)	

तिर (மட்டமிடு)

(परस्मै पद)

तनुयात्	तनुयाताम्	तनुयुः	प्रथम
तनुयाः	तनुयात	तनुयात	मध्यम
तनुयाम्	तनुयाव	तनुयाम	उत्तम

(आत्मने पद)

तन्वीत	तन्वीयाताम्	तन्वीरन्	प्रथम
तन्वीथाः	तन्वीयाथाम्	तन्वीध्वम्	मध्यम
तन्वीय	तन्वीवहि	तन्वीमहि	उत्तम

மேலேகண்ட விகுதிச்சொற்களை உபயோகித்து சம்ஸ்கிருதத்தில் வாக்யமாக எழுத பழகுதல் வேண்டும்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ஒன்பதாவது கணத்தைச்சார்ந்த வினைச்சொற்கள்.

पॄ—காத்தல். (पॄ+ना+ति=पृणाति)

1 अश्—சாப்பிடுதல்

अश्नाति । आश । अशिता ।
अशिष्यति ॥

2 कुच्—துக்கித்தல்

कुच्नाति । चुकुन्थ । कुच्निता ।
कुच्निष्यति ॥

3 क्लिश्—கஷ்டப்படுதல்

क्लिश्नाति । चिक्लेश । क्लेशिता ।
क्लेष्टा । क्लेशिष्यति । क्लेश्यति ।

4 क्षुभ्—வரட்சியடைந்த

क्षुभ्नाति । चुक्षोभ । क्षोभिता ।
क्षोभिष्यति ।

5 ग्रन्थ्—கோர்க்க

ग्रथ्नाति । जग्रन्थ । ग्रन्थिता ।
ग्रन्थिष्यति ।

6 जॄ—முதுமை அடைய

जृणाति । जजार । जरिता, जरीता ।
जरिष्यति । जरीष्यति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

7 दृ—பிளக்க

दृणाति। ददार। दरिता। दरिष्यति

8 पुष्—வளர்

पुष्णाति। पुपोष। पोषिता।
पोषिष्यति।

9 पॄ—பூர்த்தி செய்ய

पृणाति। पपार। परीता। परीष्यति।

10 बन्ध्—கட்டுதல்

बध्नाति। बबन्ध। बद्धा।
भन्त्स्यति।

11 मन्थ्—கடைதல்.

मथ्नाति। ममन्थ। मन्थिता।
मन्थिष्यति।

12 मुष्—திருடுதல்.

मुष्णाति। मुमोष। मोषिता।
मोषिष्यति।

(उभयपद)

1 क्री—விற்க.

क्रीणाति, क्रीणीते। चिक्राय। चिक्रिये।
क्रेता। क्रेष्यति – क्रेष्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2 ग्रह्—பிடித்தல்.

गृह्णाति, गृह्णीते। जग्राह, जग्रहे।
ग्रहीता। ग्रहीष्यति, ग्रहीष्यते।

3 ज्ञा—அறிய

जानाति, जानीते। जज्ञौ, जज्ञे।
ज्ञाता। ज्ञास्यति, ज्ञास्यते।

4 धू—உதறுதல், அசைத்தல்.

धुनाति, धुनीते। दुधाव, दुधुवे।
धोता, धविता।
धोष्यति, धोष्यते।

5 लू—அறுத்தல்.

लुनाति, लुनीते। लुलाव, लुलुवे।
लविता। लविष्यति, लविष्यते।

6 पू—சுத்தி செய்தல்.

पुनाति, पुनीते। पुनाव, पुपुवे।
पविता, पविष्यति, पविष्यते।

7 प्री—திருப்தி செய்தல்.

प्रीणाति, प्रीणीते। विप्राय, विप्रिये।
प्रेता। प्रेष्यति, प्रेष्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

8 वृ—வரிக்க.

वृणाति, वृणीते। ववार, वव्रे।

वरिता। वरिष्यति, वरिष्यते।

9 श्री—பக்குவம் செய்ய.

श्रीणाति, श्रीणीते। शिश्राय, शिश्रिये

श्रेता। श्रेष्यति। श्रेष्यते।

10 स्तृ—பரப்புதல்.

स्तृणाति, स्तृणीते। तस्तार, तस्तरे।

स्तरिता स्तरिष्यति, स्तरिष्यते।

உபய பதிகளான வினைகளின்

சில ரூபங்கள்.

1. शद्—(நிகழ்காலம்)

(परस्मैपद)

प्रीणाति	प्रीणीतः	प्रीणन्ति	— प्रथम
प्रीणासि	प्रीणीथः	प्रीणीथ	— मध्यम
प्रीणामि	प्रीणीवः	प्रीणीमः	— उत्तम

(आत्मने पद)

प्रीणीते	प्रीणाते	प्रीणते	— प्रथम
प्रीणीषे	प्रीणाथे	प्रीणीध्वे	— मध्यम
प्रीणे	प्रीणीवहे	प्रीणीमहे	— उत्तम

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. ञी (குறிலவன்)

(परस्मैपद)

प्रीणातु	प्रीणीताम्	प्रीणन्तु – प्रथम
प्रीणीहि	प्रीणीतम्	प्रीणीत – मध्यम
प्रीणानि	प्रीणाव	प्रीणाम – उत्तम

(आत्मनेपद)

प्रीणीताम्	प्रीणातां	प्रीणताम्– प्रथम
प्रीणीष्व	प्रीणाथां	प्रीणीध्वम्–मध्यम
प्रीणै	प्रीणावहै	प्रीणामहै –उत्तम

3. ञी (நெடிலவன்)

(परस्मैपद)

अप्रीणात्	अप्रीणीतां	अप्रीणन् – प्रथम
अप्रीणाः	अप्रीणीतं	अप्रीणीत – मध्यम
अप्रीणं	अप्रीणीव	अप्रीणीम – उत्तम

(आत्मने पद)

अप्रीणीत	अप्रीणातां	अप्रीणत – प्रथम
अप्रीणीथाः	अप्रीणाथां	अप्रीणीध्वम्–मध्यम
अप्रीणि	अप्रीणीवहि	अप्रीणीमहि–उत्तम

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. लिङ् (வட்டகை)

(परस्मैपद)

प्रीणीयात्	प्रीणीयातां	प्रीणीयुः	—प्रथम
प्रीणीयाः	प्रीणीयातं	प्रीणीयात	—मध्यम
प्रीणीयां	प्रीणीयाव	प्रीणीयाम	—उत्तम

(आत्मनेपद)

प्रीणीत	प्रीणीयातां	प्रीणीरन्	—प्रथम
प्रीणीथाः	प्रीणीयाथां	प्रीणीध्वं	—मध्यम
प्रीणीय	प्रीणीवहि	प्रीणीमहि	—उत्तम

இவ்வாறான விகுதிச்சொற்களைக்கொண்டு வாக்கியம் களை எழுதிப்பழகுதல் வேண்டும்.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्री सोम स्तवराजः ।

यत्तत्त्वं समुपासते सुकृतिनः स्वात्मावबोधप्रभं
यत्कारुण्यनिषेकगाङ्गजलतो हृद्ग्रन्थिविद्रावणम् ।
सान्द्रानन्दमभङ्गुरं त्रिभुवनव्याप्तं च मृत्युञ्जयं
तं सोमं स्वबपुर्विभूतिविभवं हृद्गोचरं कुर्महे ॥ १ ॥

सुकृतिनः तत्तत्वं स्वात्मावबोधप्रभं (इतिकृत्वा) समुपासते, यत्कारुण्य निषेकगाङ्गजलतः हृद्ग्रन्थि-विद्रावणं (भवति) (यच्च) सान्द्रानन्दं अभङ्गुरं त्रिभुवनव्याप्तं मृत्युञ्जयं च (भवति) तं, स्वबपुर्विभूति-विभवं सोमं (सोमनाथदेवं) (वयं) हृद्गोचरं कुर्महे ॥

न्यक्कृत्यारुणमन्दहासमुषसः सानौ हिमाद्रेः सिते
कल्यान् प्रत्यवभासयत्यभिनवान् भास्वद्यदीयं स्मितं ।
मन्द्रं गर्जनहास्यमीकलयति श्रुत्वा भवानी वचः
यो विघ्नं वृजिनापहाऽवतु सदा तस्येन्दुमौलेः कृपा ॥२॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हिमाद्रेः सिते सानौ उषसः अरुणमन्दहास न्यक्कृत्य यदीयं भास्वत् स्मितं अभिनवान् कल्पान् प्रत्यवभासयति, यः (च) भवानीवचः श्रुत्वा मन्द्रं गर्जनहास्यं आकलयति, तस्य इन्दुमौलेः वृजिनापहा कृपा विश्व सदा अवतु ॥ २ ॥

विश्वादौ विमृशन्ति विष्णुरथ यं वेधा विपश्चिद्गणः

शापग्रस्तमतारयत् सकरुणः सोमं क्षयार्तं च यः
पीयूषस्रवणक्षमत्वमदिताऽस्मै स्यन्दिनेऽद्यावधि
पायाद्देवमहेश्वरो भुवि स नोऽयं काल वैश्वानरः ॥३॥

विष्णु अथ वेधाः विपश्चिद्गणः (च) यं विश्वादौ विमृशन्ति, सकरुणः यः शापग्रस्तं क्षयार्तं सोमं (चन्द्रं) अतारयत् अस्मै अद्यावधि स्यन्दिने (चन्द्राय) पीयूषस्रवणक्षमत्वं (च) अदित, सः अयं कालवैश्वानरः देवः महेश्वरः भुवि नः पायात् ॥ ३ ॥

अस्तावीद् यमनकघा दशमुखः स्थाणुं वरेण्यैर्हुतैः
मूर्धानं दशम चिकर्तिषति यः प्रासीददे कान्ततः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वृक्णान् तान् उदजीवयद् दृढमतिं भक्तौ परायां दधौ
पायान्नः परमेश्वरः स नितरां भक्तेषु यो
वत्सलः ॥ ४ ॥

यं स्थाणुं वरेण्यैः हुतैः दशमुखः (रावणः) अनेकधा अस्तावीत् (तस्मिन् रावणे) दृढमं मूर्धानं चिकर्तिषति (सति) यः एकान्ततः प्रासीदत् यः (तस्मै) तान् वृक्णान् (मस्तकान्) उदजीवयत् (तस्मै च) परायां भक्तौ दृढमतिं दधौ सः भक्तेषु नितरां वत्सलः परमेश्वरः नः पायात् ॥ ५ ॥

उपेत्य नेनेक्ति तरङ्गभङ्गिभिः
सरित्पतिर्दास्यचिकीर्षयाऽनिशम् ।
श्रियः पिता पापनिषूदनक्षमे
पदारविन्दे तव वारुणार्णवः ॥ ५ ॥

सरित्पतिः श्रियः पिता वारुणार्णवः दास्यचिकीर्षया (त्वां) उपेत्य तव पापनिषूदनक्षमे पदारविन्दे (स्वीयैः) तरङ्गभङ्गिभिः अनिशं नेनेक्ति ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रिपूनवस्कन्दितुमिद्धमन्यवः
सशस्त्रवीराः प्रधनं प्रपित्सवः ।
प्रहर्षघोषं "जयसोमनाथ"
इत्यदभ्रसिंहस्तनितेन सस्वनुः ॥ ६ ॥

रिपून् अवस्कन्दितुं प्रधनं प्रपित्सवः इद्धमन्यवः सशस्त्रवीराः प्रहर्षघोषं अदभ्रसिंहस्तनितेन "जय सोमनाथ" इति सस्वनुः ॥

अभूददक्षोऽधिकरोहिणीरतिः
कलानिधिः शिष्टकलत्रनिःस्पृहः ।
स दक्षशापादवसन्नविग्रहो
गदाभियुक्तोऽजनि राजयक्ष्मणा ॥ ७ ॥

कलानिधिः (चन्द्रः) (एकदा) अदक्षः (सन्) शिष्टकलत्रनिःस्पृहः (भूत्वा) अधिकरोहिणीरतिः अभूत् सः (चन्द्रः) दक्षशापाद् अवसन्नविग्रहः राजयक्ष्मणा गदाभियुक्तः अजनि ।

परिभ्रमन् विभ्वमिदं रुजाऽऽकुलः
प्रभासतीर्थं विशदं समागतः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

असौम्यमस्तोकतपः समाचरन्
व्रतेन सोमोऽर्चितवान् महेश्वरम् ॥ ८ ॥

रजाकुलः (चन्द्रः) इदं विश्वं परिभ्रमन् शिवं प्रभासतीर्थं समागतः। असौम्यं अस्तोकं (च) तपः समाचरन् (असौ) सोमः (चन्द्रः) व्रतेन महेश्वरं अर्चितवान् ॥

तदाऽऽशुतोषस्य हरस्य तोषणात्
सुधांशुरासीत् सितपक्षकान्तिमान्
स्वयम्भुवो ज्योतिरिदं चिरन्तनं
अतिष्ठिपद् दीप्तहिरण्मये गृहे ॥ ९ ॥

तदा आशुतोषस्य हरस्य तोषणाद् (असौ चन्द्रः) सुधांशुः सितपक्षवान् (च) आसीत्। (सः चन्द्रः च) स्वयम्भुवः (शिवस्य) इदं चिरन्तनं ज्योतिः (लिङ्गरूपं) दीप्तहिरण्मये गृहे अतिष्ठिपत् ॥ ९ ॥

पुलस्त्यपौत्रोऽपरोह पुष्पकान्
मयस्करं शम्भुमुपास्य, दारुणम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तपोऽत्र तेपे, करणानि रावणो
नियम्य, चक्रे कलधौतमन्दिरम् ॥ १० ॥

पुलस्त्यपौत्रः रावणः पुष्पकाद् (विमानात्) अवरुरोह, अत्र मयस्करं शम्भुमुपास्य (स्वकीयानि) करणानि नियम्य दारुणं तपः तेपे, (अपि च शिवस्य) कलधौतमन्दिरं चक्रे ॥

अवाप्य घोराङ्गिरसो मुनेर्हरिः
समग्रयोगं स्थितधीर्जनार्दनः ।
विमृश्य विष्णोर्हृदयं स्वचेतसा
पिनाकपाणिं पुनरत्र पिप्रिये ॥ ११ ॥

अत्र पुनः स्थितधीः हरिः जनार्दनः घोराङ्गिरसः मुनेः समग्रयोगं अवाप्य, स्वचेतसा विष्णोः हृदय (शिवं) विमृश्य पिनाकपाणिं पिप्रिये ॥ ११ ॥

युधिष्ठिरो यं प्रथमं सपर्यया
जगद्गुरुं माधवमाचिचत्क्रतौ ।
स निर्ममे चन्दनदारुसौरभं
शिवस्य शौरिः सदनं विसृत्वरम् ॥ १२ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यं जगद्गुरुं माधव युधिष्ठिरः (राजसूये) क्रतौ सपर्यया प्रथमं आर्चिचत् सः शौरिः (कृष्णः) शिवस्य चन्दनदारुसौरभं विमृत्वरं (च) सदनं निर्ममे ॥

सुरादिभिर्यद् वरिवस्ययार्चितं
विरिञ्चिना भूविवरेषु हाटकम् ।
भवस्य लिङ्गं वितले निवेशितं
प्रवर्तनार्थं भुवनस्य शक्तिमत् ॥ १३ ॥

सुरादिभिः वरिवस्यया अर्चितं भवस्य यद् शक्तिमद् हाटकं लिङ्गं विरिञ्चिना भुवनस्य प्रवर्तनार्थं भूविवरेषु वितले (पाताले) निवेशितम् ॥ १३ ॥

कृतं न मानं हरिणा न वेधसा
उपर्यधो यस्य निरूपणादपि ।
तदादिलिङ्गं शुचि सोम-संज्ञितं
ऋते प्रसादात् कथमीक्षितुं क्षमम् ॥ १४ ॥

यस्य च (लिङ्गस्य) उपरि अधः (च) निरूपणादपि हरिणा वेधसा (वा) मानं न कृतं तत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शुचि आदिलिङ्गं सोमसंज्ञितं भवति । (इदं सोमलिङ्गं) (शिवस्य) प्रसादात् ऋते ईक्षितुं (अपि) कथं क्षमम् ? (युक्तम्)

समुद्रवेलोपचयक्षयादिभिर्
अहर्निशं सिन्धुपयः समाकृषन् ।
सदाऽप्रमत्तो द्विजराज आदरा-
ज्जलाभिषेकं कुरुते स्मरान्तके ॥ १५ ॥

द्विजराजः (चन्द्रः, उत्तमः विप्रो वा)

समुद्रवेलोपचयादिभिः सिन्धुपयः अहर्निशं समाकृषन्, सदा अप्रमत्तः (सन्) स्मरान्तके (शङ्करे) आदरात् जलाभिषेकं कुरुते ॥

पुराणनौकाशय आढ्यपत्तने
सरस्वती यत्र समुद्रमाविशत् ।
दिवाकरस्यात्र विशिष्टमन्दिरं
शिवोऽपि कालाग्नितया विभावितः ॥ १६ ॥

यत्र (वेदोक्ता) सरस्वती समुद्रं आविशत् (तस्मिन्) पुराणनौकाशय आढ्यपत्तने अत्र

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दिवाकरस्य विशिष्टं मन्दिरं (आसीत्) शिवः अपि (अत्र) कालाग्नितया विभावितः ॥

महागुरुः पाशुपताग्रणीरिह
स्थिरं निवासं लकुलीश आभजत् ।
उमापतेरंश इति प्रसिद्धिमान्
मठं स शैवं विदधे सभाजितम् ॥ १७ ॥

इह पाशुपताग्रणीः महागुरुः, उमापतेः अंश इति प्रसिद्धिमान्, लकुलीशः स्थिरं निवासं आभजत् । सः (लकुलीशः अत्र) सभाजितम् शैवं मठं विदधे ॥

भवापचित्यै बलभीपुरःसरै-
र्नृपेन्द्रयोग्या सरणिः प्रकल्पिता ।
उपास्य चालुक्यनृपाः स्वदैवतं
परम्परीणं क्रममभ्यवर्धयन् ॥ ४ ॥

बलभीपुरस्सरैः नृपैः भवापचित्यै (अत्र) नृपेन्द्रयोग्या सरणिः प्रकल्पिता (आसीत्) चालुक्यनृपाः सोमनाथरूपं स्वदैवतमुपास्य (पूजायाः) परम्परीणं क्रमं अभ्यवर्धयन् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कनौजराजाः प्रतिहारगुर्जरा
अधीश्वरा उत्तरभारतस्य ये ।
मनोनिवेशेन सुराष्ट्रमाययुः
शिवं समाराधयितुं नमस्यया ॥ १९ ॥

ये उत्तरभारतस्य अधीश्वराः कनौजराजाः प्रतिहारगुर्जराः । (ते) नमस्यया शिवं समाराधयितुं मनोनिवेशेन सुराष्ट्रं आययुः ॥

प्रसन्नतीर्थप्रतिरोधिनां वधात्
समूलमुन्मूल्य रिपुं दुरासदम् ।
स मूलराजः प्रभविष्णुरीश्वरं
विधाय यात्रां अकुतोभयां जगौ ॥ २० ॥

प्रसन्नतीर्थप्रतिरोधिनां वधात्, दुरासदं रिपुं समूलं उन्मूल्य, यात्रां अकुतोभयां विधाय, स प्रभविष्णुः मूलराजः ईश्वरं जगौ ॥

பதங்கள்

स्वात्मावबोधशमम् - ஆத்ம ஞானத்துக்கு சமமான காந்தியுடைய

ग्रन्थिविघ्नावनम् - ஹிரு- தயத்தில் உள்ள அக்ஞான த்தைப் போக்கவல்ல.

साम्राज्यम् ஆனந்த மய மான (ஆனந்த கட்டி)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

न्यक्कृत्य - திரஸ்காரம் செய்து

नृजिनाहा - பாபத்தைப் போக்கவல்ல.

विमृशति - விசாரம் செய்கிறான்

अदिस - கொடுத்தான்.

चिकीर्षति - செய்ய விரும்புகிறான்.

एकान्ततः - தனிமையில் (எப்பொழுதும்)

उज्जीवयत् - ஜீவிக்கச் செய்தார்.

पापनिष्कृतये - பாபத்தை துலைப்பதில் சக்தி வாய்ந்த

नेमिदे - சுத்தம் செய்கிறார்.

अवस्कन्दितुम् - அவமதிப்பதற்கு

दण्डव्यथः - தாண்டப்பட்ட வேகத்தை உடைய

महासिंहस्तनितेन - பெரும் சிங்கத்தின் சப்தத்தினால்

सस्वनुः - சப்தித்தனர்.

अवसन्नविग्रहः - கஷ்டத்துடன் கூடின சரீரத்தை உடையவன்

अस्तोढ - பெரிது

अतिष्ठिपत् - ஸ்தாபித்தார்.

करणानि - இந்திரியங்கள்

कलधौतम् - தங்கம்

निमिषे - திருப்தி செய்தது.

अर्चिषत् - பூஜை செய்தான்

विमृत्यवम् - பரவுகின்ற

परिस्तया - பூஜையினாலே

अवाप्तचित्ये - ஸம்ஸார நாசத்திற்காக

परम्परीणम् - பரம்பரையாக வரும்

अनुत्रोमयाम् - எங்கும் பயமில்லாத

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

படம் 12

॥ गजः ॥

चतुष्पदां मध्ये गजः खलु दर्शनीयः पशुः। भूधराकारशरीरस्यास्य कन्दराकारं मुखं लम्बमाना शुण्डा च विलसति। अस्य ग्रीवा लम्बा न भवति। नेत्रे अतिलघूनि कर्णौ च शूर्पानुकारौ भवतः। अयं स्तम्भानुकल्पैः नातिमनोहरैः सुदृढैश्चतुर्भिः पादैः शोभते। शुण्डैवास्य नासिकाऽपि भवति। अनयैवायं श्वसिति पानीयं वा पिबति। पुष्पाण्यपि चेतुं शक्नोति अनयाऽयम्। इयमेवास्य हस्तस्थाने वर्तते। अतोऽयं 'करी' हस्तीवेत्युच्यते।

अयं हि शुभ्राभ्यां सुदृढाभ्यां भाति दन्ताभ्याम्। लघु लाङ्गूलमस्य विशाले देहे महाकाशे मशक इव न शोभते। महाबलिष्ठाः भवन्ति करिणः। ते सुब्रह्मण्ये ब्रह्मदेशे विन्ध्याटवीषु रेवातटीषु लङ्कायां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आफ्रिकाप्रान्तेषु सान्द्रघनेष्वन्यत्र च लभ्यन्ते। ते हि प्रायेण मेघश्यामकान्तयः। क्वचिदरुणा अपि श्रूयन्ते। गजाः वन्यफलानि, तरूणां छदान्, वंशदलानि, नानाविधानि मूलानि, विविधान् कन्दान्, लताः, पत्राणिः इक्षून्, अन्यानि चारण्यशाकानि भक्षयन्ति। गजद्वारे पालितास्तु सगलपाशाः सचरणयुगलगाढंनिगडिताः सस्कन्धबन्धास्ते बहुविधानि अन्नानि सस्नेहासान् प्रायेणेक्षुकाण्डांश्च चर्वन्तो दृष्टिपथमायान्ति।

ब्रह्मदेशे भारतेऽपि च पालिता गजाः दारुकार्यालयेषु काष्ठभारान् वहन्ति। पुरा भारते युद्धोपयोगिनो बभूवुः करिणः॥

हस्तिनः एको गृहीताङ्कुशः महामात्रो भवति। यश्च तमुपनयति खाद्यवस्तूनि, पाययति पानीयम्, प्रेरयति च यातुं स्थातुमपि। हस्ती तु तस्यादेशमनुपालयति। वन्या गजास्तु यूथान् संघाद्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महारण्येषु निवसन्ति। एकस्मिन् यूथे कश्चिदेको नायको भवति यः सङ्घे शास्ति। सङ्घे कलभाः करिण्यश्च मध्यतश्चरन्ति, बलिष्ठाः पुङ्गजास्तु सर्वतः। एते सरःसु अवगाहमानाः कमलाकरेषु स्वैरं रमन्ते। गीतानि रोचन्ते गजेभ्यः। गजो यथा बलवांस्तथैव बुद्धिमान् धीरस्वभावः सगर्वगम्भीरश्च भवति। राजद्वार-पुष्टोऽयं दान्तः शान्तश्च सञ्जायते। अयमस्य स्वामिनं हस्तिपकं तस्य कुटुम्बं च सम्यक् परिचिनोति। स्निह्यति च तेभ्यः।

असावस्य शुण्डादण्डेन स्वैरं खेलापयति शिशून् चिनोति च सूक्ष्माण्यपि वस्तूनि भूमौ पतितानि। अस्य घ्राणं श्रोत्रे च प्रबलानि भवन्ति। अयं प्रगल्भश्चाटूक्तिप्रियः नातिमर्षणः च भवति। दुर्व्यवहरतः प्राणिनोऽसौ यमपुरगामिनो विदधाति। एष सर्पेभ्यः वृश्चिकेभ्यश्च बिभेति। चिरेण प्रसुवते गजस्त्रियः मनोहराश्च भवन्ति करिपोतकाः। बहुमूल्यानि भवन्ति दन्तावलानां अस्थीनि च निर्मीयन्ते च तैः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बहूपयोगीनि समर्घाणि च वस्तूनि। पुरा गजः राजवाहनं बभूव। अयं माङ्गलिकवस्तुषु गण्यते। वरयात्रासु मङ्गलमहोत्सवेषु समराङ्गणे चैनमग्रगमकुर्वन् राजानः॥

(राजवंस्कृतम्)

पदंगळ்

चतुष्पदाम् - நாற்கால்கள் கொண்ட பிராணிகளுடைய

शूर्पानुकारी - முறம் போன்ற

कर्णिः - யானைகள்

चेतुम् - சேகரிப்பதற்காக

सगलपाशाः - கழுத்தில் பாசத்துடன் கூடினவை

महामात्रः - யானைப்பாகன்

हस्तिपः - யானைப்பாகன்

यूथः - யானைக் கூட்டம்

परिचिनोति - தெரிந்து கொள்ளுகிறது.

समर्घाणि - விலை மதிக்கத்தக்காத.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

॥ सीताविमुक्तस्य रामस्य विलापः ॥

सलक्ष्मणं शोकवशामिपन्नं शोके निमग्नो विपुले

तु रामः

उवाच वाक्यं व्यसनानुरूपं उष्णं विनिश्वस्य

रुदन् सशोकम् ॥ १ ॥

राज्यप्रणाशः स्वजनैर्वियोगः पितुर्विनाशो

जननीवियोगः ।

सर्वाणि मे लक्ष्मण शोकवेगमापूरयन्ति

प्रविचिन्तितानि ॥ २ ॥

सर्वं तु दुःखं मम लक्ष्मणेदं शान्तं शरीरे

घनमेत्य शून्यम् ।

सीताविमोगात्पुनरप्युदीर्णं काष्ठैरिवाग्निः

सहसा प्रदीप्तः ॥ ३ ॥

मया विहीना विजने जने या रक्षोभिराहृत्य

विकृष्यमाणा ।

नूनं निनादं कुररीव दीना सा मुक्तवत्या-

यतकान्तनेत्रा ॥ ४ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्मिन् मया सार्धं उदारशीले शिलातले
पूर्वमिहोपविष्टा ।
कान्तस्मिता लक्ष्मणजातहासा त्वामाह सीता
बहुवाक्यजातम् ॥ ५ ॥
गोदावरीयं सरितांवरिष्ठा प्रिया प्रियाया मम
नित्यकालम् ।
अप्यत्र गच्छेदिति चिन्तयामि नैकाकिनी याति हि
सा कदाचित् ॥ ६ ॥
पद्माननां पद्मविशालनेत्रां पद्मानि वानेतु-
मभिप्रयाता ।
तदप्ययुक्तं न हि सा कदाचित् मया विना
गच्छति पङ्कजानि ॥ ७ ॥
कामं त्विदं पुष्पितवृक्षखण्डं नानाविधैः
पक्षिगणैरुपेतम् ।
वनं प्रयाता नु तदप्ययुक्तं एकाकिनी सा अतिभीमेति
भीरुः ॥ ८ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आदित्य भो लोककृताकृतज्ञ लोकस्य सत्यानृत-
कर्मसाक्षिन् ।
मम प्रिया सा क्व गता हृता वा शंसस्व मे
शोकवशस्य सत्यम् ॥ ९ ॥
लोकेषु सर्वेषु च नास्ति किञ्चिद्यत्ते न नित्यं
विदितं भवेत्तत् ।
शंसस्व वायो कुलशालिनीं तां हृता मृता वा
पथि वर्तते वा ॥ १० ॥
अतीव तं शोकविधेयदेहं रामं विसंज्ञं
विलपन्तमेवम् ।
उवाच सौमित्रिरदीनसत्त्वो न्याये स्थितः
कालहितं च वाक्यम् ॥ ११ ॥
शोकं विमुञ्चार्य धृतिं भजस्व सोत्साहता चास्तु
विमार्गणेऽस्याः ।
उत्साहयन्तो हि नरा न लोके सीदन्ति कर्मस्वति
दुष्करेषु ॥ १२ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பதங்கள்

व्यसनानुरूपम् - துக்கத்துக் குத்தக்க தான

प्रणाशः - விநாசம்

प्रविभिन्नानि - நன்கு ஞா- பகப்படுத்திக் கொள்ளப்- பட்டன.

उद्दीप्तं - விருத்திபண்ணப் பட்டதாக

रक्षोभिः - அரக்கர்களினால்

एकाकिनी - தனிமை யானவள்

प्रयाता - சென்றாளோ

ब्रूहि त्व - சொல்

विलपन्तम् - அழுது கொண் டிருக்கிற

अधीनसत्त्वः - குறைவற்ற சக்தியை உடையவன்

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

பாடம் 14

रामस्य वनगमनम्

रामः - वत्सलक्ष्मण! किमाज्ञापयति मध्यमा माता अनेन कार्यलेखेन।

लक्ष्मणः- आर्य वाचयामि तमहम्।

अस्त्वेकेन वरेण वत्सः भरतो भोक्ताधिराज्यस्यमे
यात्वन्येन विहाय कालहरणं रामोवनं दण्डकाम्।
तस्यां चीरधरश्चतुर्दश समास्तिष्ठत्वसौ तं पुनः
सीतालक्ष्मणमात्रकात् परिजनादन्यो न चानुव्रजेत्॥

राम—अहोप्रसादोत्कर्षः।

तत्रैव गमनादेशो यत्र पर्युत्सुकं मनः।
न चेष्टविरहो जातः स च वत्सोऽनुजोऽनुगः॥

लक्ष्मणः—दिष्टयाऽनुमोदितोऽहमार्येण।

धिक् कष्टमार्यया सीतयाऽपि गन्तव्यम्। अये युधाजित् आर्यभरतसहचरस्तातमुपसर्पति।

[युधाजिद्भरतौ प्रविशतः]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

युधाजित्—रामभद्र ! अवक्षस्व पादपरिचारक-
मरण्यानुगतं भरतम् ।

रामः—नन्वस्यापि वर्णाश्रमरक्षणे गुरुनियोगः ।

भरतः—लक्ष्मणस्य शत्रुघ्नस्य वा तद्भवतु ।

रामः—किमत्र कस्यचित्स्वरुचिः ।

भरतः—एतावत्येव मे स्वरुचिः ।

रामः—शक्यं नाम मयि तिष्ठति त्वयान्येन वा
पितृनियुक्तमुल्लङ्घयितुम् ।

भरतः—हा कथं परित्यक्तोऽस्मि मन्दभाग्यः ।

युधाजित्—वत्स समाश्वसिहि समाश्वसिहि ।

भरतः—मातुल उद्धर माम् ।

युधाजित्—वत्स एवं तावत् (इति भरतस्य कर्णे
कथयित्वा) रामभद्र एवमयं विज्ञापयति-यदेतत्
भवता शरभङ्गेण प्रेषितं तपनीयोपानद्युगलं
तदार्यः प्रसादीकरोत्विति ॥

रामः—(तदुन्मुच्य) गृहाणैतद्वत्स ।

भरतः—(शिरस्यारोप्य) हा आर्य ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रामः—(परिष्वज्य) वत्स मत्पादस्पृष्टिकया प्रतिनिवर्तस्व ।

भरतः—अयमहमिदानीम् ।

नन्दिग्रामे जटा बिभ्रदभिषिञ्चर्यपादुके ।
पालयिष्यामि पृथ्वीं च यावदार्यो निवर्तते ॥

(इति सीतारामौ प्रदक्षिणीकरोति)

युधाजित्—वत्स रामभद्र अनुगच्छाम्यहं वः ।

रामः—मातुल मातुल प्रतिनिवर्तस्व । अयं च वो हस्ते भरतः ।

युधाजित्—वत्स अनुरुध्यस्व मामनुगच्छन्तम् ।

रामः—शान्तं पापं शान्तं पापम् । गुरवो हि यूयमनुगन्तव्यानानुगन्तारः । आत्मना तृतीयेन मया गन्तव्यमित्यम्बादेशः ।

युधाजित्—किमहमेकोऽनुगच्छामि । अपि तु सबाल वृद्धाः प्रकृतयः । किं न पश्यसि ।

रामः—मातुल मातुल गुरुभिरेव शिशवः धर्मलोपात्पालयितव्याः । तत्प्रसीदतः । प्रतिनिवर्त्यतामयं महाजनः । (इति प्रणमति)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

युधाजित्—वत्स उत्तिष्ठोत्तिष्ठ । बोधयित्वा प्रजाः
क्वापि मन्दभाग्यो गच्छामि ।
त्वां लक्ष्मण महाबाहो त्वां च वैदेहनन्दिनि ।
आमन्त्रये निवृत्तोऽस्मि पापः कल्याणमस्तुवाम्॥

[इति सर्वे निष्क्रामन्ति]

பதங்கள்

कालहरणम् - வீண்தாமதம் (காலத்தைப் போக்குதல்)
दण्डकाम् - தண்டகாரண்யத்தை
चतुर्दशसमाः - பதினான்கு வருஷங்கள்
प्रसादोत्कर्षः - அநுக்ரஹவிசேஷம்
गुरुनियोगः - தகப்பனாரின் கட்டளை
स्वरुचिः - தன் விருப்பம்.
पितृनियुक्तम् - தகப்பனால்கட்டளையிடப்பட்டது.
तपनीयोपमद्विगुलम् - தங்கத்தால் ஆன இருமிரி அடிகள்.
बिभ्रत् - தரிக்கின்ற
अनुजानीत - அநுமதிக்க வேண்டும்
पालयितव्याः - காப்பாற்றப்பட வேண்டியவர்கள்.

———

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

படம் 15

श्री सोमस्तवराजः

(उत्तरार्धः)

हिरण्यरत्नादिसमृद्धिमण्डितं
ग्रहीतुकामो गज्ञनी-महम्मदः ।
शिवालयं खण्डितवाञ्जगत्प्रभोः
स्वमान्यपूजान्यविधेरमर्षणः ॥ २१ ॥

हिरण्यरत्नादिसमृद्धिमण्डितं (शिवालयं श्रुत्वा) ग्रहीतुकामः (सन्) गज्ञनीमहम्मदः स्वमान्य पूजाऽन्य विधेः अमर्षणः (भूत्वा) जगत्प्रभोः शिवालयं खण्डितवान् ।

ततोऽचिराद् गुर्जरमालवाधिपौ
प्रशास्तभीमः श्रुत-भोज इत्युभौ ।
पुनर्नवीनं शिवसद्म चक्रतुः
प्रणम्य राष्ट्रस्य हृदेप्सितं प्रभुम् ॥ २२ ॥

ततः अचिराद् (एव) प्रशास्तभीमः श्रुतभोजः इत्युभौ गुर्जरमालवाधिपौ (भारत) राष्ट्रस्य हृदा शसितं प्रभुं (सोमनाथं) प्रणम्य नवीनं शिवसद्म पुनः चक्रतुः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

करग्रहं यात्रिकसङ्घगर्हितं
अवेक्ष्य देवो जयसिंह आदिशत् ।
विमुक्तिमस्माज्जननीनिदेशतः
प्रतापमोघीकृतसिन्धु वर्बरः ॥ २३ ॥

प्रतापमोघीकृतसिन्धुवर्बरः (प्रतापेन आधो मोघीकृतः पश्चात् सिन्धुः बर्बरः येन सः) देवः जयसिंहः (सिन्धुराजः) (प्रभासयात्रासंबन्धिनं) करग्रहं यात्रिकगर्हितं अवेक्ष्य (स्व)· जननीनिदेशतः अस्मात् (करग्रहात् यात्रिकाणां) विमुक्तिं आदिशत् ॥

कुमारपालः प्रयतो महीपतिः
परप्रतिष्ठा नयनोत्सवं व्यधात् ।
मठाधिपं भावबृहस्पतिं विधौ
पुरोहितं गण्डपदेन पूजयन् ॥ २४ ॥

प्रयतो महीपतिः कुमारपालः विधौ (प्रतिष्ठापन विधौ) मठाधिपं भावबृहस्पतिं (अवस्थाप्य तं) "गण्ड" पदेन पूजयन् परप्रतिष्ठानयनोत्सवं व्यधात् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चकार भीमः पृथुमण्डपद्वयं
ततः शिवाम्नायगुरुः प्रतिष्ठितः ।
विनिर्ममे भव्यनिकेतनं नवं
महायशस्कं त्रिपुरान्तकः स्वयम् ॥ २५ ॥

(नृपो) भीमः पृथुमण्डपद्वयं चकार । ततः प्रतिष्ठितः शिवाम्नायगुरुः (नाम्ना) त्रिपुरान्तकः (शिवस्य) नवं भव्यनिकेतनं स्वयं विनिर्ममे ।

अला उदिन् खिल्जि-चमूपतिः पुनर्
मठस्य विध्वंसविधौ धियं दधौ ।
अकारि चूडासमभूभृता चिरान्
नवो महीपाल इति श्रुतेन सः ॥ २६ ॥

पुनः अला उदिन् - खिलजि चमूपतिः (अस्य) मठस्य विध्वंसविधौ धियं दधौ । सः (मठः) अचिराद् (एव) "महीपाल" इति श्रुतेन चुडासम (वंश) भूभृता नवः अकारि ।

द्विदुर्ग उत्सादितवान् महम्मदः
पुनश्च संवर्धितमास मन्दिरम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

औरङ्गजीबो मुगलोऽतितिक्षया
क्षयं ततः प्रापितवान् महीपतिः ॥ २७ ॥

द्विदुर्ग ("बेगडो" इति ख्यातः) महम्मदः (मन्दिरमिदं पुनः) उत्सादितवान् पुनश्च (तद्) मन्दिरं संवर्धयामास ततः मुगलो महीपतिः औरङ्गजेबः (पुनरपि (तन्मन्दिरं) अतितिक्षया क्षयं प्रापितवान् ।

तदेककाले च घनाजिजादवः
सुराष्ट्रजेताऽऽविरभूत् सविक्रमः ।
अनेकतीर्थोद्धरणोद्यमा च या
नवं कृतं स्थानमहल्यया तया ॥ २८ ॥

तदेककाले च सुराष्ट्रजेता स विक्रमः घनाजि-जादवः आविरभूत् । या अनेक तीर्थोद्धरणोद्यमा (आसीत्) तया अहल्यया (शिवस्य) नवं स्थानं कृतम् ॥

बभञ्ज भूयोऽत्र गणो यदा यदा
विधर्मिणां देवगृहं तदा तदा ।
प्रपन्नधीर्भारत संस्कृतिर्दधौ
सनातनं तत्र पुनर्महोऽधिपात् ॥ २९ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदा यदा विधर्मिणी गणः भूयः अत्र देवगृहं बभञ्ज तदा तदा प्रपन्नधीः भारतसंस्कृतिः पुनः तत्र अचिराद् (एव) (शिवस्य ज्योतिर्लिङ्गरूपं) सनातनं महः (ज्योतिः दधौ ॥

दिनेषु गच्छत्सु शिवप्रसादतो
निरर्गला भारतपुण्यभूरभूत् ।
उदर्चिरह्नां सुदिनत्वमागतं
विमुक्तिसिद्धेरदितेरुपक्रमः ॥

दिनेषु गच्छत्सु (सत्सु) (इयं नः) भारतपुण्यभूः शिवप्रसादतः निरर्गला अभूत् । अह्नां (च) उदर्चिः सुदिनत्वमागतम्। विमुक्तिसिद्धे (देवामातुः मुक्तिदेव्याः) अदितेः (अपि) उपक्रमः (संघटितः)

समागतो भारतलोहपूरुषः
प्रभासतीर्थं जनमान्यवल्लभः ।
कृतप्रतिज्ञः सलिलेन वारिधेः
शिवालयोद्धारनिविष्टमानसः ॥ ३१ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(ततः) भारतलोहपूरुषः जनमान्यवल्लभः (वल्लभभाई पटेलः) प्रभासतीर्थं समागतः। (यः) शिवालयोद्धारनिविष्टमानसः (सन्) वारिधेः सलिलेन कृतप्रतिज्ञः (अभूत॥)

ऋष्यम्बरद्योनयनाख्य वत्सरे
पक्षे सिते माधवपञ्चमी तिथौ।
अस्थापयद्राष्ट्रपतिर्महेश्वरं
राजेन्द्रसंज्ञो मिथुनोदये शुभे॥ ३२॥

(विक्रमाब्दस्य) ऋष्यम्बरद्योनयनाख्यवत्सरे (२००७ वत्सरे) माधव (वैशाख) पञ्चमीतिथौ सिते पक्षे शुभे मिथुनोदये (मिथुनोदये (मिथुनस्थ लग्ने, प्रभाते ९-४७ भारतप्रमाणकृतमाने घण्टावादनसमये) राजेन्द्रसंज्ञः राष्ट्रपतिः महेश्वरं (सोमनाथं अत्र प्रभासपत्तने) अस्थापयत।

श्रीवासुदेवो विससर्ज विग्रहं
यत्र स्थले पूतपुरस्य सन्निधौ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुण्यस्मृतेस्तत्र शिलाविधिः कृतः
सौराष्ट्रराजप्रमुखेनभक्तितः ॥ ३३ ॥

पूतपुरस्य (प्रभासस्य) सन्निधौ यत्र स्थले श्रीवासुदेवः (स्वकीयं) विग्रहं विससर्ज तत्र सौराष्ट्रराज प्रमखेन भक्तितः (तस्य भगवतः श्री कृष्णस्य) पुण्यस्मृतेः शिलाविधिः कृतः ।

अन्नस्य मन्त्री मुनिशी महाशयः
स्वप्नस्य सिद्धेः परमां मुदं गतः ।
श्रद्धान्वितः संस्कृतविश्वपर्षदः
संस्थापनं कारितवान् महाफलम् ॥

भारतराष्ट्रस्य अन्नस्य मन्त्री मुनिशी महाशयः (स्वकीयस्य) स्वप्नस्य सिद्धेः परमां मुदं गतः श्रद्धान्वितः (चासन्) संस्कृतविश्वपरिषदः महाफलं संस्थापनं कारितवान् ।

स्मर्तव्यं यज्जीवितश्वास एषा
वाणी दैवी संस्कृता संस्कृतेर्नः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्वारूप्यं यद्भारतीय तदास्तौ
संकल्पानां शुद्धिरस्याः प्रसादात् ॥ ३५ ॥

(अस्माभिः सर्वैः इदं) स्मर्तव्यं यद् एषा संस्कृता नाम दैवी वाणी न संस्कृते जीवितश्वासः (भवति) भारतीयं यत्स्वारूप्यं (अस्ति) तदास्तौ (नः) संकल्पानां शुद्धिः अस्याः (संस्कृतभाषायाः) प्रसादात् (एव शक्या)

मूढो जनः स्वविभवं मनुतेऽत्र सृष्टौ
दोषं परत्र गुणमात्मनि वीक्षमाणः ।
विद्याविगर्हितनियोगमतिर्मदान्धः
भ्रान्तः प्रपातशिखरे त्वरया प्रधावन् ॥३६॥

परत्र दोषं आत्मनि (च) गुणं वीक्षमाणः मूढः जनः अत्र (ईश्वरस्य) सृष्टौ स्वविभवं मनुते । (कीदृशः सन्) विद्याविगर्हितनियोगमतिः, मदान्धः भ्रान्तः प्रपातशिखरे (च) त्वरया प्रधावन् सन् ॥

किं दुष्करं हर जगद्ग्रसनप्रवृत्तौ
उन्मेष एष परमेशदृशः समर्षः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संवर्धितः सरभस प्रलयानलोऽस्य
नीराजयत्यखिलविश्वविनाशशीलः ॥ ३७ ॥

हर-जगद्-ग्रसनप्रवृत्तौ (तृतीयनेत्रोद्घाटनेन जगद्ग्रसनकार्ये हरे प्रवृत्ते सति तस्य) किं दुष्करं (भवति)? परमेशदृशः उन्मेष एव समर्थः। (स्यात् सद्य एव च) सरभसं संवर्धितः अखिलविश्व विनाशशीलः प्रलयानलः अस्य (हरस्य) नीराजयति।

श्यामोपलाप्रतिस्तवविश्वमूर्ते
आदाय चिन्मयवपुः करुणारुणार्द्रम्।
सिञ्चत् सुधामितिस्तुमां जगतीं कृतार्थां
कृत्वा महेश्वर! तिरोभवति स्वमूर्तौ ॥

विश्वमूर्ते! महेश्वर! श्यामोपला प्रतिकृतिः सुधास्तुति सिञ्चत् करुणारुणार्द्र चिन्मयवपुः आदाय जगतीं कृतार्थां कृत्वा स्वमूर्तौ तिरोभवति।

तदेव गर्भस्थं गृहं च सा शिला
यथातथं द्विसहस्रवत्सरान्।
अनन्तनस्योपरि यत्र नूतनः
पुराणमूर्तेर्गरिमा प्रकाशते ॥ ३९ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्विसहस्रवत्सरान् ('यावत्) तद्देवगर्भस्य गृहं सा (एव) च (ब्रह्मन) शिला यथातथं (वर्तते) यत्र (गर्भगृहे ब्रह्मशिलायां) अधस्तनस्य उपरि पुराणमूर्तेः (शङ्करस्य) नूतनः गरिमा प्रकाशते ॥

जगत् त्रयं शाम्भवनर्तनस्थली
नटाधिराजोऽत्र परः शिवः स्वयम् ।
सभा नटो रंग इति व्यवस्थितिः
स्वरूपतः शक्तियुतात् प्रपञ्चिता ॥ ४० ॥

(इदं अखिलं) जगत्त्रयं शाम्भव नर्तनस्थली (एव भवति) अत्र (नर्तनस्थल्यां) नटाधिराजः स्वयं परः शिवः (वर्तते सभा, नटः, रंगः," इति (सर्वा इयं) व्यवस्थितिः (शिवेन) शक्तियुतात् (उमा-सहितात्) स्वरूपतः (आत्मस्वरूपादेव) प्रपञ्चिताअस्ति। (शिवः निमित्तकारणम्, उपादानकारणं अपि भवति, उमासहितश्चायं भगवान् सोमः ।)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मायाशक्तिविहरणपटुः क्रीड्यन् रक्तिमानं
गण्डे तस्या रज इति तमो लीनवत्कां च
वेणीम् ।
सत्वोद्रेगं कथयति पुनः स्वान्तशक्तिं विदग्धो
मायावीस्यान्निखिलभुवनाधीश्वरो नोऽनुकूलः ॥

विहरणपटुः विदग्धः निखिलभुवनाधीश्वरः मायाशक्तिं क्रीडयन् तस्याः गण्डे रक्तिमानं रजः (रजो गुण इति नः) कथयति, (तस्याः) लीनवत्कां वेणीं तमः (तमोगुण इति नः कथयति, तस्याः) स्वान्तशुद्धिं सत्वोद्रेकं (सत्वगुणस्य उद्रेकं इति नः असौ) पुनः कथयति । (एवं विधः) मायावी (असौ निरिवलभवनाधीश्वरः) नः अनुकूलः स्यात् ॥

—रचयिता. श्री जयन्तकृष्ण. ह. वर्मे.

॥ शुभम् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

BHARATIYA VIDYA BHAVAN
18-22, East Mada Street,
Mylapore, Chennai - 600 004.
Phone : 2494 0811

CC-0. In Public Domain. Cuddalore Collection. TN.